# ११. पादुका सहस्रम् - सञ्चार पद्धतिः (६०)

``अग्रतस्ते गमिश्यामि मृद्नन्ती कुश कण्टकान्" ।
इति सीताऽपि यद्वृत्ति मियेष प्रणमामि ताम् ॥ ११.१॥ २६१॥

शरदः शतमम्ब पादुके स्यां
समयाहूत पितामह स्तुतानि ।
मणिमण्टपिकासु रङ्गभर्तुः
त्वदधीनानि गतागतानि पश्यन् ॥ ११.२॥ २६२॥

त्वदधीन परिक्रमो मुकुन्दः तदधीनस्तव पादुके विहारः ।
इतरेतर पारतन्त्र्य मित्थं युवयोः सिद्धमनन्य तन्त्रभूम्नोः ॥ ११.३॥ २६३॥

रजसा तमसा च दुष्टसत्वे
गहने चेतसि मामके मुकुन्दः ।
उचितं मृगया विहार मिच्छन्
भवती माद्दत पादुके पदाभ्याम् ॥ ११.४॥ २६४॥

क्षमया जगता मपि त्रयाणां
अवने देवि पदावनि त्वयैव ।
अभिगम्य तमोऽपि संश्रितानां
अभिगन्ता भवति स्वयं मुकुन्दः ॥ ११.५॥ २६५॥

शिरसा भवतीं दधाति कश्चित्
        विधृतः कोऽपि पदस्पृशा भवत्या ।
उभयो र्मधुवैरि पादरक्षे
        त्वदधीनां गति मामनन्ति सन्तः ॥ ११.६॥ २६६॥

स्पृशतः शिरसा पदेन च त्वां
        गति मुद्दिश्य मुकुन्द पादुके द्वौ ।
अवरोहति पश्चिमः पदात् स्वात्
        अधिरोहत्यनघ स्तदेव पूर्वः ॥ ११.७॥ २६७॥

समयेष्वपदिश्य जैत्रयात्रां विविधान्तः पुरवागुरा व्यतीतः ।
नियतं मणिपादुके भवत्या रमते वर्त्मनि रङ्ग सार्वभौमः ॥ ११.८॥ २६८॥

निज संहनन प्रसक्त लास्यं चरति त्वामधिरुह्य रङ्गनाथः ।
पदरक्षिणि पावनत्व मास्तां रसिका स्वादमतः परं न विद्मः ॥ ११.९॥ २६९॥

पदयो रनयोः परस्य पुंसः
        तदनुग्राह्य विहार पद्धतेर्वा ।
शिरसो मणिपादुके श्रुतीनां
        मनसो वा मम भूषणं त्वमेका ॥ ११.१०॥ २७०॥

कृपया मधुवैरि पादरक्षे
कठिने चेतसि मामके विहर्तुम् ।
मकुटेषु दिवौकसां विधत्ते
भवती रत्न विसंस्थुलेषु योग्याम् ॥ ११.११॥ २७१॥

चरणद्वय मर्भकस्य शौरेः
शरदम्भोरुह चातुरी धुरीणम् ।
शकटासुर ताडनेऽपि गुप्तं
तव शक्त्या किल पादुके तदासीत् ॥ ११.१२॥ २७२॥

उत्तस्थुषो रङ्गशयस्य शेषात् आस्थान सिंहासन मारुरुक्षोः ।
मध्येनिशान्तं मणिपादुके त्वां लीलापदन्यास सखीं प्रपद्ये ॥ ११.१३॥ २७३॥

प्राप्ताधिकाराः पतयः प्रजानां उत्तंसिता मुत्तम पादुके त्वाम् ।
रङ्गेशितुः स्वैर विहारकाले संयोजयन्त्यङ्घ्रि सरोजयुग्मे ॥ ११.१४॥ २७४॥

त्वयाऽनुबद्धां मणिपादरक्षे लीलागतिं रङ्गशयस्य पुंसः ।
निशामयन्तो न पुनर्भजन्ते संसार कान्तार गतागतानि ॥ ११.१५॥ २७५॥

व्यूहानुपूर्वी रुचिरान् विहारान्
पदक्रमेण प्रतिपद्यमाना ।
बिभर्षि नित्यं मणिपादुके त्वं

मुरद्विषो मूर्तिरिव त्रिलोकीम् ॥ ११.१६॥ २७६॥

पदेषु मन्देषु महत्स्वपि त्वं
नीरन्ध्र संश्लेषवती मुरारेः ।
प्रत्यायनार्थं किल पादुके नः
स्वाभाविकं दर्शयसि प्रभावम् ॥ ११.१७॥ २७७॥

कृपा विशेषात् क्षमया समेतां
प्रवर्तमानां जगतो विभूत्यै ।
अवैमि नित्यं मणिपादुके त्वां
आकस्मिकीं रङ्गपतेः प्रसत्तिम् ॥ ११.१८॥ २७८॥

उपागताना मुपताप शान्त्यै
सुखा वगाहां गति मुद्वहन्तीम् ।
पश्यामि शौरेः पदवाहिनीं त्वां
निम्नेषु तुङ्गेषु च निर्विशेषाम् ॥ ११.१९॥ २७९॥

सह प्रयाता सततं प्रयाणे
प्राप्तासने संश्रित पादपीठा ।
अलङ्घनीया सहजेन भूम्ना
छायेव शौरे र्मणिपादुके त्वम् ॥ ११.२०॥ २८०॥

पदस्पृशा रङ्गपति र्भवत्या विचक्रमे विश्वमिदं क्षणेन ।
तदस्य मन्ये मणिपादरक्षे त्वयैव विख्यात मुरुक्रमत्वम् ॥ ११.२१॥ २८१॥

सञ्चारयन्ती पदमन्वतिष्ठः सहायकृत्यं मणिपादरक्षे ।
मातस्त्वमेका मनुवंश गोप्तु र्गोपायतो गौतम धर्मादारान् ॥ ११.२२॥ २८२॥

त्वत्त स्त्रिविष्टप चरा नसपत्नयिष्यन्
आरुह्य तार्क्ष्य मवरुह्य च तत्क्षणेन ।
शुद्धान्त भूमिषु पुन र्मणिपादरक्षे
विश्राम्यति त्वयि विहार वशेन शौरिः ॥ ११.२३॥ २८३॥

विक्रम्य भूमि मखिलां बलिना प्रदिष्टां
देवे पदावनि दिवं परिमातुकामे ।
आसीदतो दिनकरस्य करोपतापात्
संरक्षितुं पदसरोज मुपर्य भूस्त्वम् ॥ ११.२४॥ २८४॥

त्वत्सङ्गमा न्ननु सकृद्विधि संप्रयुक्ता
शुद्धिं परा मधिजगाम शिवत्व हेतुम् ।
रङ्गाधिराज पदरक्षिणि कीदृशी सा
गङ्गा बभूव भवदीय गतागतेन ॥ ११.२५॥ २८५॥

वृद्धिं गवां जनयितुं भजता विहारान्

कृष्णेन रङ्ग रसिकेन कृताश्रयायाः ।
सञ्चारत स्तव तदा मणिपादरक्षे
वृन्दावनं सपदि नन्दन तुल्य मासीत् ॥ ११.२६॥ २८६॥

मातस्त्वयी मयतया चरण प्रमाणे
द्वे विक्रमेषु विविधेषु सहायभूते ।
नाथस्य साधु परिरक्षण कर्मणि त्वं
दुष्कृद्विनाशन दशासु विहङ्गराजः ॥ ११.२७॥ २८७॥

पादावनि क्वचन विक्रमणे भुजानां
पञ्चायुधी कररुहै र्भजते विकल्पम् ।
नित्यं त्वमेव नियता पदयो र्मुरारेः
तेनासि नून मविकल्प समाधि योग्या ॥ ११.२८॥ २८८॥

अक्षेत्रविद्भि रधिगन्तु मशक्य वृत्तिः
मातस्त्वया निरवधि र्निधि रप्रमेयः ।
रथ्यान्तरेषु चरणावनि रङ्गसङ्गी
वात्सल्य निघ्न मनसा जनसात् कृतोऽसौ ॥ ११.२९॥ २८९॥

सम्पद्यते समुचितं क्रम माश्रयन्त्या
सद्वर्त्मना भगवतोऽपि गति र्भवत्या ।
ईष्टे पदावनि पुनः क इवेतरेषां

व्यावर्तनस्य विषमा दपथ प्रचारात् ॥ ११.३०॥ २९०॥

रङ्गेश्वरेण सह लास्य विशेष भाजो
लीलोचितेषु तव रत्न शिलातलेषु ।
मध्ये स्थितानि कतिचिन् मणिपादरक्षे
सभ्यान् विशेष मनुयोक्तु मिति प्रतीमः ॥ ११.३१॥ २९१॥

नित्यं पदावनि निवेश्य पदं भवत्यां
निष्पन्द कल्प परिमेय परिच्छदानि ।
शृङ्गार शीतल तराणि भवन्ति काले
रङ्गेश्वरस्य ललितानि गतागतानि ॥ ११.३२॥ २९२॥

भोगार्चनानि कृतिभिः परिकल्पितानि
प्रीत्यैव रङ्गनृपतिः प्रतिपद्यमानः ।
पश्यत्सु नित्य मितरेषु परिच्छदेषु
प्रत्यासनं भजति काञ्चन पादुके त्वाम् ॥ ११.३३॥ २९३॥

अन्तस्तृतीय नयनैः स्वय मुत्तमाङ्गैः
आविर्भविष्य दतिरिक्त मुखाम्बुजैर्वा ।
न्यस्यन्ति रङ्ग रसिकस्य विहारकाले
वारक्रमेण कृतिनो मणिपादुके त्वाम् ॥ ११.३४॥ २९४॥

रङ्गेश्वरे समधिरूढ विहङ्गराजे
मातङ्गराज विधृतां मणिपादुके त्वाम् ।
अन्वासते विधृत चारु सितातपत्राः
स्वर्गौकसः सुभग चामर लोल हस्ताः ॥ ११.३५॥ २९५॥

विष्णोः पदं गतिवशा दपरित्यजन्तीं
लोकेषु नित्य विषमेषु समप्रचाराम् ।
अन्वेतु मर्हति धृता मखिलैः सुरेन्द्रैः
गङ्गा कथं नु गरुडध्वज पादुके त्वाम् ॥ ११.३६॥ २९६॥

भिक्षा मपेक्ष्य दनुजेन्द्र गृहं प्रयातुः
गुप्त्यै गवां विहरतो वहतश्च दूत्यम् ।
तत्तादृशानि चरणावनि रङ्गभर्तुः
त्वत्सङ्गमेन सुभगानि विचेष्टितानि ॥ ११.३७॥ २९७॥

निर्व्यज्यमान नवताल लय प्रथिम्ना
निर्यन्त्रणेन निज सञ्चरण क्रमेण ।
मृद्नासि रङ्ग नृपते र्मणिपादुके त्वं
दुःखात्मकान् प्रणमतां दुरित प्ररोहान् ॥ ११.३८॥ २९८॥

नित्यं य एव जगतो मणिपादरक्षे
सत्तास्थिति प्रयतनेषु परं निदानम् ।

सोऽपि स्वतन्त्र चरितस्त्वदधीन वृत्तिः
का वा कथा तदितरेषु मितम्पचेषु ॥ ११.३९॥ २९९॥

निर्विष्ट नाग शयनेन परेण पुंसा
न्यस्ते पदे त्वयि पदावनि लोकहेतोः ।
स्वर्गौकसां त्वदनुधावन तत्पराणां
सद्यः पदानि विपदा मपदं भवन्ति ॥ ११.४०॥ ३००॥

शर दुपगम काले सन्त्यजन् योगनिद्रां
शरण मुपगतानां त्राणहेतोः प्रयास्यन् ।
जलधि दुहितु रङ्गान् मन्द मादाय देवि
त्वयि खलु निदधाति स्वं पदं रङ्गनाथः ॥ ११.४१॥ ३०१॥

स्पृशसि पदसरोजं पादुके निर्विघातं
प्रविशसि च समस्तां देवि शुद्धान्त कक्ष्याम् ।
अपरमपि मुरारेः पूर्व माभीर कन्यासु
अभिसरण विधीना मग्रिमा साक्षिणी त्वम् ॥ ११.४२॥ ३०२॥

प्रतिभवन मनन्ये पादुके त्वत्प्रभावात्
विविधवपुषि देवे विभ्रम द्यूतकाले ।
अभिलषित सपत्नी गेहयात्रा विघातं
ग्लहयति रहसि त्वां षोडशस्त्री सहस्रम् ॥ ११.४३॥ ३०३॥

तटभुवि यमुनाया श्छन्नवृत्ते मुकुन्दे
मुहुरधिगम हेतो र्मुह्यतां यौवनानाम् ।
शमयितु मल मासीच्छङ्ख चक्रादि चिह्ना
प्रतिपद विचिकित्सां पादुके पद्धतिस्ते ॥ ११.४४॥ ३०४॥

अधिगत बहुशाखान् मञ्जुवाचः शुकादीन्
सरसिज निलयायाः प्रीतये सङ्ग्रहीतुम् ।
प्रकटित गुणजालं पादुके रङ्गबन्धोः
उपनिष दटवीषु क्रीडितं त्वत्सनाथम् ॥ ११.४५॥ ३०५॥

मुनि परिषदि गीतं गौतमी रक्षणं ते
मुहु रनुकलयन्तो मञ्जुवाचः शकुन्ताः ।
उषसि निजकुलाया दुत्थिता दण्डकेषु
स्वयमपि पदरक्षे स्वैर माम्रेडयन्ति ॥ ११.४६॥ ३०६॥

यमनियम विशुद्धै र्यत्न पश्यन्ति चित्तैः
श्रुतिषु चुलुक मात्रं दृश्यते यस्य भूमा ।
सुलभ निखिल भावं मांस दृष्टे र्जनस्य
स्वय मुपहरसि त्वं पादुके तं पुमांसम् ॥ ११.४७॥ ३०७॥

निधिमिव निरपायं त्वामनादृत्य मोहात्

अहमिव मम दोषं भावयन् क्षुद्रमर्थम् ।
मयि सति करुणायाः पूर्णपात्रे त्वया किं
पर मुपगमनीयः पादुके रङ्गनाथः ॥ ११.४८॥ ३०८॥

कमपि कनक सिन्धोः सैकते सञ्चरन्तं
कलश जलधि कन्या मेदिनी दत्त हस्तम् ।
अनिश मनुभवेयं पादुके त्वय्यधीनं
सुचरित परिपाकं सूरिभिः सेवनीयम् ॥ ११.४९॥ ३०९॥

परिसर मुपयाता पादुके पश्य मातः
करण विलय खेदात् कान्दिशीके विवेके ।
पुरुष मुपनयन्ती पुण्डरीकाक्ष मग्रे
पुनरुदर निवास क्लेश विच्छेदनं नः ॥ ११.५०॥ ३१०॥

सा मे भूयात् सपदि भवती पादुके तापशान्त्यै
यामारूढो दिवमिव शुभैः सेव्यमानो मरुद्भिः ।
सौदामिन्या सह कमलया सह्यजा वृद्धि हेतुः
काले काले चरति करुणा वर्षुकः कृष्णमेघः ॥ ११.५१॥ ३११॥

सत्याल्लोकात् सकल महितात् स्थानतो वा रघूणां
शङ्के मातः समधिक गुणं सैकतं सह्यजायाः ।
पूर्वं पूर्वं चिरपरिचितं पादुके यत् त्यजन्त्या

नीतो नाथस्तदिद मितर न्नीयते न त्वयाऽसौ ॥ ११.५२॥ ३१२॥

अग्रे देवि त्वयि सुमनसा मग्रिमै रन्तरङ्गैः
विन्यस्तायां विनय गरिमा वर्जिता दुत्तमाङ्गात् ।
दत्ते पादं दर मुकुलितं त्वत्प्रभावाति शङ्की
देवः श्रीमान् दनुज मथनो जैत्रयात्रा स्वनन्यः ॥ ११.५३॥ ३१३॥

पौरोदन्तान् परिकलयितुं पादुके सञ्चरिष्णोः
व्यक्ता व्यक्ता वशिक विशिखा वर्तिनी रङ्गभर्तुः ।
वेलातीत श्रुति परिमलै र्व्यक्ति मभ्येति काल्ये
विन्यासस्ते विबुध परिषन्मौलि विन्या सदृश्यैः ॥ ११.५४॥ ३१४॥

आसंस्काराद् द्विज परिषदा नित्य मभ्यस्य माना
श्रेयोहेतुः शिरसि जगतः स्थायिनी स्वेन भूम्ना ।
रङ्गाधीशे स्वय मुदयिनि क्षेप्तुमन्धं तमिस्रं
गायत्रीव त्रिचतुर पदा गण्यसे पादुके त्वम् ॥ ११.५५॥ ३१५॥

भवतीं परस्य पुरुषस्य रङ्गिणो
महिमान मेव मणिपादु मन्महे ।
कथ मन्यथा स्वमहिम प्रतिष्ठितः
प्रतितिष्ठति त्वयि पदात्पदं प्रभुः ॥ ११.५६॥ ३१६॥

तिथि रष्टमी यदवतार वैभवात्
प्रथमा तिथि स्त्रिजगता मजायत ।
मणिपादुके तमुपनीय वीथिकासु
अतिथी करोषि तदनन्य चक्षुषाम् ॥ ११.५७॥ ३१७॥

अपार प्रख्याते रशरण शरण्यत्व यशसा
ननु त्वं रङ्गेन्दोश्चरण कमल स्यापि शरणम् ।
यया लभ्यः पङ्गु प्रभृतिभि रसौ रङ्गनगर-
प्रतोली पर्यन्ते निधि रनघ वाचां निरवधिः ॥ ११.५८॥ ३१८॥

तत्तद्दास गृहाङ्गण प्रणयिनः श्रीरङ्ग शृङ्गारिणो
वाल्लभ्या दविभक्त मन्थरगति स्त्वं मे गतिः पादुके ।
लीला पङ्कज हल्ल कोत्पल गलन्माध्वीक सेकोत्थिता
यत्रामोद विकल्पना विवृणुते शुद्धान्त वारक्रमम् ॥ ११.५९॥ ३१९॥

सम्भवतु पादरक्षे सत्य सुपर्णादि रौपवाह्य गणः ।
यात्रासु रङ्गभर्तुः प्रथम परिस्पन्द कारणं भवती ॥ ११.६०॥ ३२०॥

इति कवितार्किक सिंहस्य सर्वतन्त्र स्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य
श्रीमद्वेदान्ताचार्यस्य कृतिषु श्रीरङ्गनाथ पादुकासहस्रे
सञ्चार पद्धति रेकादशी ॥